# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - ओक्टोम्बर् - २०१९

| | | |
|---|---|---|
| कक्षा – आचार्य-१ (SEM-1) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
| विषयः - सर्वदर्शनम् | CC- 4.1.2 | समयः – ८ त: ११ |
| दिनाङ्कः – ११-१०-२०१९ | (ग्रन्थः – न्या.सि.मुक्तावली,अनुमानप्रकरणात् द्रव्यनिरूपणान्ता) | |

प्रथमान्वितिः (युनिट-१)

**प्रश्नः -१ द्वयोरेकस्य समाधानं यच्छत ।** ०५

(१) 'व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्।
अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि॥' व्याख्यात।

(२) 'सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्॥' व्याख्यात।

**प्रश्नः -२ द्वयोरेकस्य व्याख्या कार्या ।** १०

(१) 'साध्यवदन्याऽवृत्तित्वमि'ति व्याप्तिं दलसार्थक्यसहितं व्याख्यात।

(२) सिद्धान्तव्याप्तेर्लक्षणं यथामुक्तावलिं व्याख्यात।

द्वितीयान्वितिः (युनिट-२)

**प्रश्नः -३ द्वयोरेकस्य उत्तरं देयम् ।** ०५

(१) असिद्धहेत्वाभासं समुक्तावलि व्याख्यात।

(२) हेत्वाभाससामान्यलक्षणं यथाग्रन्थं समन्वयं कुरुत।

**प्रश्नः -४ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) सप्रभेदमनैकान्तिकहेत्वाभासं समुक्तावलि व्याख्यात।

(२) हेत्वाभासानां लक्षणभेदान् सकारिकं विवृणुत।

तृतीयान्वितिः (युनिट-३)

**प्रश्नः -५ द्वयोरेकस्य उत्तरं देयम्।** ०५

(१) उपमित्युत्पत्तिप्रकारं यथामुक्तावलि व्याख्यात।

(२) शाब्दबोधप्रकारं व्याख्यात।

**प्रश्नः -६ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) "शक्तिग्रहं व्याकरणोपमाने"ति कारिकां विवृण्वन्तु ।

(२) जातावेव शक्तिर्न तु व्यक्तौ इति मतं प्रतिपाद्य निरस्यत।

चतुर्थान्वितिः (युनिट-४)

**प्रश्नः -७ द्वयोरेकस्य उत्तरं देयम् ।** ०५

(१) शक्त्यात्मिकां वृत्तिं यथाग्रन्थं व्याख्यात ।

(२) पदचातुर्विध्यं प्रदर्शनीयम्।

**प्रश्नः -८ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) लक्षणावृत्तिं यथामुक्तावलि विशदयत।

(२) शाब्दबोधकारणानि यथाग्रन्थं प्रतिपादयत।

**प्रश्नः -९ निम्नलिखितेषु दशप्रश्नानां समाधानानि एकवाक्येन लिखन्तु ।** १०

(१) कः परामर्शः?

(२) 'लिङ्गं तु करणं न हि' कस्मात्?

(३) वह्निमान् धूमादित्यत्र साध्यः कः?

(४) प्रतियोग्यनधिकरणत्वं कथं वाच्यम्?

(५) अभावः कः बोध्यः?

(६) हेत्वाभाससामान्यलक्षणं किम्?

(७) विरुद्धः कः?

(८) उपमितिकरणं किम्?

(९) का नाम वृत्तिः?

(१०) किं नाम विवरणम्?

(११) कारिकावली केन रचिता?

(१२) किं नाम तात्पर्यम्?

(१३) किं नाम रूढम्?

(१४) किं नाम गोत्वत्वम्?

(१५) सिद्धान्तव्याप्तेः लक्षणं किम्?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा - ओक्टोम्बर् - २०१९

| | | |
|---|---|---|
| कक्षा – आचार्य-१ (SEM-1) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
| विषयः - सर्वदर्शनम् | CC- 4.1.2 | समयः - |
| दिनाङ्कः - | (ग्रन्थः – न्या.सि.मुक्तावली,अनुमानप्रकरणात् द्रव्यनिरूपणान्ता) | |

## प्रश्नः - ७
## समाधानानि

१. व्याप्यस्य पर्वतादि वृत्तित्वं पक्षधर्मता।
२. अनागतादिलिङ्गेन न स्यादनुमितिस्तस्मात्।
३. वह्निः साध्यः।
४. प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यम्।
५. प्रतियोगिव्यधोकरणो बेध्यः।
६. यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम्।
७. साध्यव्यापकीभूताभावप्रतियोगि विरुद्धः।
८. उपमानम्।
९. शक्तिलक्षणान्यतरः सम्बन्धः।
१०. तत्समानार्थकपदान्तरेण तदर्थकथनम्।
११. श्री विश्वनाथपञ्चाननभट्टाचार्येण।
१२. वक्तुरिच्छा तु तात्पर्यम्।
१३. यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या बुध्यते तद्रूढम्।
१४. गवेतराऽसमवेतत्वे सति सकलगोसमवेतत्वम्।
१५. हेत्वधिकरणवृत्यत्यन्ताभावाऽप्रतियोगिसाध्यसामानाधिकरण्यम्।